 ISSN 976-8645

# ज्योतिषशास्त्रे षड्विधग्रहबलप्रयोजनम्

दिनेश[९४]

अस्माकमृषिभिः योगबलमाध्यमेन **'यत्पिण्डे तत्ब्रह्माण्डे'** इति तत्वं विज्ञाय शरीरस्थसौरमण्डले एव ग्रहनक्षत्रादीनां पिण्डानां रहस्यं विज्ञातम्। ग्रहनक्षत्रणि ब्रह्माण्डीयैः पदार्थैः निर्मितास्सन्ति। तथैव मानवानामपि निर्मितिर्भवति। ब्रह्माण्डनि पिण्डानि च समष्टिव्यष्टिभेदतः परस्परं मिलितानि सन्ति। यथोक्तम्–

**ब्रह्माण्डनि पिण्डानि च समष्टिव्यष्टिभेदतः।**
**परस्परविमिश्राणि सन्त्यनन्तानि संख्यया॥**[95]

ब्रह्माण्डस्य सर्वेऽपि पदार्थाः परस्परं प्रभाविताः भवन्ति। अतो सुनिश्चितमिदं यदसौ जीवः ग्रहबलेनाभिभूयते। सर्वेषु ग्रहेषु सूर्यः प्रधानः। निर्विवादमेतद् यत् नैके ग्रहाः सूर्यं निकषा परिक्रमन्ते। एते सर्वे ग्रहाः रवेराकर्षणशक्त्याभिभूत्य तथा च सूर्यरश्मिप्रभावेण प्रभाविताः भवन्ति। जन्मपत्रस्थाः सूर्यादयो नवग्रहाः जातकस्य जननकाले तस्य जीवनं स्वीयबलैः प्रभावयन्ति। जातकस्य यथार्थशुभाशुभफलज्ञानार्थं ग्रहाणां बलाबलत्वं नितरामावश्यकमस्ति यतो हि ग्रहाः स्वबलाबलानुसारं शुभाशुभफलं प्रकटयन्ति। जन्मकुण्डल्यां ग्रहः यावन्मितः बलयुक्तः तादृशमेव तस्य शुभाशुभप्रभावो भवति। यथोक्तं पाराशरशास्त्रे–

**ग्रहे पूर्णबले पूर्णबलमर्द्धमर्द्धे बले फलम्।**
**पादं हीनबले खेटे ज्ञेयमित्थं बुधैरिति॥**[96]

ग्रहस्य शुभाधिपत्वे सति शुभफलस्याधिकता विपरीतावस्थायां पापफलस्याधिक्यं भवति। एवमेव प्रकारेण यदि ग्रहः केन्द्रत्रिकोणाधिपो भूत्वाऽस्तङ्गतः नीचराशयुक्तश्च स्यात्तदाऽशुभफलदायको भवति। अनेन सिद्धं योगकारकग्रहाणां बलत्वं मारकग्रहाणां निर्बलत्वञ्च कुण्डल्यां शुभफलस्य सूचकतां प्रदर्शयति। ग्रहाणां बलानुसारेणैव योगानां निर्मितिर्भवति। यावदधिकं बलं यस्मिन् विद्यमानयोगाः तारतम्येन ब्राह्मणादिवर्गविभागमिव उत्कृष्टतानुसारं स्वशुभाशुभफलं प्रकटयन्ति। यदि बली ग्रहाः कस्यापि योगस्य निर्माणं विदधते तदा स्वत एव योगोऽपि बली जायते। शुभग्रहाणामवदाने सति योगोऽधिको बली भवति। शुभभावे शुभयोगे ग्रहः नैसर्गिकं बलमधिनोति। अतः बलयुक्तेषु ग्रहेष्वेव योगकारकत्वमायाति। सति योगेऽपि निर्बलो ग्रहः योगकृदर्थात् फलदातुमक्षमो भवति। योगकारकग्रहेषु स्वोच्चमूलत्रिकोणादिस्थितस्य ग्रहस्य बलत्वमुक्तं जातकशास्त्रेषु। पुनश्चापि षड्वर्गदशवर्गषोडशवर्गादिशुद्धो ग्रहो बलवान् भवति, सरावल्यान्तु षड्वर्गशुद्धग्रहः षड्बलतुल्यो मन्यते। अतः षड्बलाधिक्यवान् ग्रहः योगादीनां कारकत्वे

---

[94] रा.व.मा.विद्यालय- घनियारा, धर्मशाला, जिला- कांगडा (हि.प्र.)

1-सूर्यांक, गीता प्रेस गोरखपुर -पृ.सं.-54

1- बृहत्पाराशरहोराशास्त्र- अ.-25,श्लो.-148

विशेषफलप्रदो भवति। अयमेव विचारो ग्रहबलवद्भावबलेष्वपि भवति। इत्थं ग्रहाणां सर्वविधबलाबलं विचारणीयम् भवति। यदि ग्रहाः बलिनो भवेयुस्तदा योगकारकत्वं तेष्वायाति। तदा वक्तुं शक्यते शास्त्रेषु कथिताः योगाः अवश्यमेव सफलाः भवेयुरिति। यद्यपि राजयोगादिप्रसङ्गे ग्रहाणां बलत्वमवश्यमेव भवितव्यमित्यस्मिन् विषये न विशेषरूपेण कुत्रापि निर्दिष्टं तथापि स्वयं सिद्धमिदं यत् बलवत्सु सत्सु ग्रहेषु यदि योगाः जायन्ते तदा तद्योगजन्यफलानि जातका अवश्यमेव प्राप्नुयुः। ज्योतिषशास्त्रस्य फलादेशविषयकमुख्यभूतानां सिद्धान्तानां ज्ञानं षड्बलसाधनान्तरमेव भवति। अतस्तेषामधस्तात् विवेचनं प्रस्तूयते –

**दशापद्धतिः**

षड्बलनिर्द्धारणं विना दशाक्रमावबोधो न भवति। दशाक्रमनिर्णयसन्दर्भे वराहमिहिर-कल्याणवर्मादिभिराचार्यैः चन्दसूर्ययोर्बलस्य निर्धारणं कृत्वा सर्वाधिकबलीग्रहस्य दशैव सर्वप्रथमा मन्तव्या इत्यनुशंसितम्। जातकदेशमार्गे स्पष्टं कथितं यत् लग्नचन्द्रयोर्मध्ये यो बली स्यात्तदा नक्षत्रानुसारं विंशोत्तरीदशाया निर्णयः कर्तव्यः। यथोक्तम्-

**लग्ने बलिन्युदयलग्नगतोडुत स्यात्।**
**इन्दोरिवोडुपदशाधिपति क्रमेण॥**[97]

साम्प्रतिके काले जन्मकालीनचन्द्रनक्षत्रेण दशानिर्णयस्याधिको सर्वांशतश्च प्रचारो दृश्यते। पद्धतिरियमापाततः शुद्धाशास्त्रसम्मताश्च नास्ति। जन्मलग्नस्य चन्द्रस्य षड्बलाधारेण बलवत्तायाः निर्णयः कृत्वैव प्रथमः दशेशः ज्ञातव्यः। परञ्च ज्योतिर्जगतः सुविधावादयुगेऽस्मिन् षड्बलस्यास्य सर्वत्रोपेक्षा क्रियतेऽस्य परिश्रमसाध्यत्वात्। किञ्च दशास्वर्तदशासु प्राप्यमाणस्य शुभाशुभफलस्य निर्णयोऽपि ग्रहस्य सापेक्षबलेनैव क्रियते।

**आयुर्दायसाधनम्**

आयुर्दायसाधनमपि ग्रहाणां बलमाध्यमेन भवति। सूर्यादिग्रहाणां बलाबलविचारेणैव ज्योतिर्विद्भिः आयुः कथनीयम्। ग्रहाणां बलाबलज्ञानं विनाऽऽयुदार्यज्ञानं भवितुं न शक्यते।

आयुर्दायस्य लग्नायु-अंशायु-निसर्गायुपद्धतिषु का पद्धतिः कस्य जातकस्य कृते उपयुक्ता प्रयुक्ता वा भविष्यत्यस्य निर्द्धारणं ग्रहब्रलमाध्यमेन क्रियते। लग्नेशस्य बलोपेतेऽशांयु, सूर्येऽधिके बले पिण्डोद्भवमायुः, चन्द्रे बलवति नैसर्गिकमायुः ग्राह्यम्।[98] अतः मुनिभिरुक्तेषु बहुविधायुर्दायपद्धतिषु अभीष्टासु निर्णयार्थं षड्बलज्ञानमत्यावश्यकम्।

**भावफलम्-**

1- जातकादेशमार्ग- अ.-12,श्लो.-11

2- जातकपद्धति.- अ.-5,श्लो.-25

ग्रहाणां बलाबलेनैव भावफलं निर्धार्यते। आधाररूपे भावे सूर्यादयो ग्रहाः आधेयरूपाः भवन्ति। यद्याधाराः शुभाशुभयुतार्दृष्टाश्च स्युस्तदा तदनुसारमेव भावपुष्टिर्हानिर्वा भवति। यथोक्तमाचार्यमुकुन्देन-

**आधेयाः स्युर्भास्कराद्या ग्रहेन्द्राः आधारभस्थानभावा निरूक्ताः।**
**यद्याधारा सौम्ययुक्तेक्षिता ये तेषां पुष्टिर्हानिरूक्ताऽन्यथा तु॥**[99]

विचारितभावस्य कारकग्रहस्य भावेशस्य भावेऽवस्थितग्रहस्य दृष्टिवशात् शभफलं भवति। द्वयधिकाः ग्रहाः यदि कस्मिन्नपि भावे वृद्धिकारकहानिकारकयोगान् पृथक्कृत्वा द्वयोः योगयोर्यदन्तरं भवेत्तदनुसारमेव भावबलं निर्णीयते। यथोक्तं भावमञ्जर्याम्-

**ग्रहस्या सोर्ज्जाबललक्षणानि प्रोक्तानि तेषां गणनां विधाय।**
**तदनन्तरं विहदधीतशेषं वशेन भावस्य चितिश्च हानिः॥**[100]

बली-निर्बलो वा ग्रहः स्वबलानुपातेनैव कष्टेष्टफलं विदधाति। ग्रहाणां कष्टेष्टफलमाध्यमेन दशान्तर्दशाकाले शुभाशुभत्वं (शरीरादीनां) ज्ञायते। इष्टफलाधिक्ये शुभफलं कष्टफलाधिक्येऽशुभफलन्तथा साम्ये सति मिश्रितफलं भवति। फलादेशविषयकमुख्यभूतयोगदशा-आयुर्दायकष्टेष्टफलादिनिर्णये षड्बलं मुख्यस्थानं अवधत्ते। सूर्यादिग्रहाणां शास्त्रे शुभाशुभफलानि निगदितानि सन्ति। यदि बलविषयकसिद्धान्तानामालोडनम् सम्यक्तया न भवेत् चेत्तदा ग्रहस्य शुभाशुभफलं निर्धारयितुं न शक्यतेऽतः ग्रहबलज्ञानमावश्यकम्।

ज्योतिषशास्त्रे षड्बलं फलादेशस्य आधारभूततत्त्वं विद्यते। षड्बलसाधनान्तरमेव फलादेशे सूक्ष्मतायाति। सम्पूर्णभचक्रस्य क्षेत्रं बिन्दुमात्रं नास्त्यपितु विस्तृतं विपुलञ्चास्ति। विस्तृते क्षेत्रेऽस्मिन् ग्रहस्थिते ग्रन्थोक्तफलं प्रत्येकं बिन्दौ भिन्नत्वं भजते। यतो हि शास्त्रेषु प्रतिपादितं यत्फलमस्ति तत्सर्वमाकाशचारीग्रहबिम्बेन सम्बद्धमस्ति। अत फलादेशनिर्णयार्थं विस्तृतस्यराशिचक्रस्यैकस्मिन्नेवकालैकरूपं फलमवैज्ञानिकमस्ति यतो हि ग्रहबिम्बाः आकाशे गतिशीलाः भवन्ति। ग्रहस्थित्यनुसारेण ज्योतिषशास्त्रस्य प्रत्येकं घटना भवतीति ज्योतिर्विदां मतम्। अतोऽस्माभिरेतदपि स्वीकरणीयं यत् वैयक्तिकभौगोलिकराजनैतिकचक्रमिव ग्रहफलं राशिभावादिमध्यावसाने चयापचयेन बद्धमस्ति। शास्त्रवर्णितग्रहस्थिते राशिनक्षत्रविशेषस्य वा फलं महत्स्थूलमस्ति तत्फलं राशिनक्षत्रभावविशेषस्यैकस्मिन्नेव स्थाने न तुल्यरूपम्। भावादौ भावान्ते च कस्यापि ग्रहस्य पूर्णफलं भवति तथ्यमेतत् सर्वथा युक्तिहीनम्। नवांशादारभ्य नवांशान्तं यावत् बिन्दुद्वयमध्ये कस्मिन्नपि क्षणे जातकोत्पत्तिः 'लग्ननवांशपतुल्यतनुः स्यात्' इति वचनानुसारं तं जातकं पूर्णरूपेण तदनुसारं कर्तुं न शक्नोति। लग्नारम्भे लग्नावसाने च फलमात्रायां न्यूनाधिक्यमवश्यमेव भवितव्यम्। पाश्चात्यज्योतिर्विदः अपि भावप्रवृत्तिनिवृत्तिकालः (ेचमबजे) समफलदायक इति मतं तिरस्कुर्वन्ति। अतः स्पष्टं यत् राश्यादेः प्रवृत्तौ फलस्य प्रवृत्तिः निवृत्तौ फलस्य

---

1- ज्योतिषशब्दकोष, आचार्यमुकुन्दवल्लभकृत -भावादिवर्गः,पृ.सं.-125

2-भाव मञ्जरी- अ.-6,श्लो.-2

3-जातकपारिजात, दशाफलाध्याय ।

निवृत्तिश्च भवति। प्राचीनजातकपद्धतिकारैः षड्बलसाधने सिद्धान्तोऽयं ग्रहस्थितिप्रभावादेवोपस्थापितः। योऽत्यन्तः तक्रसङ्गतः वैज्ञानिकश्चास्ति। वस्तुत 'बलसाधनपद्धतिः' केशवाद्याचार्याणां मौलिकं चिन्तनं नासीत्, अपितु फलिताचार्यैः स्वस्वग्रन्थेषु निर्दिष्टग्रहाणां राशिभावादिफलानामानुपातिकरूपमेव पद्धत्यामस्यां वर्णितम्, यं विना भविष्यकथनं वस्तुतः स्थूलमासीत्। केशवावादिभिराचार्यैः षड्बलसाधनपद्धत्या फलादेशस्य वैज्ञानिकधारोपस्थापित इत्याचार्यमुकुन्देनापि स्पष्टमुद्घोषितम्।[101] जन्मपत्रिकायां प्रायशः गणनाश्रयो गृह्यते। यतो हि तेषु स्थलेषु कलाविकलाविषयिणी शुद्धिरशक्यैव। इष्टकालिकलग्ने ग्रहनवांशादौ कलाविकलानां स्थूलता प्रायः तिष्ठत्येव। फलितमार्तण्डस्य भूमिकायामाचार्यमुकुन्देन कथितम् यत् यदि भावभावेशकारकदर्शीभावोऽवस्थितानां विचारपुरस्सरं षड्बलमपि समाश्रियते तदा फलादेशव्यभिचरितो न भविष्यति। फलितज्योतिषस्य जातकेतरशाखासु मूहर्तादिशास्त्रे भौमदोषादिप्रसङ्गे बलसाधनपद्धतेः पूर्णरूपेणोपेक्षा क्रियते। एतादृशेष्वेव स्थलेषु केशवाचार्यादिभिः स्वीकृतमनुमोदितं वा बलसाधनं दैवज्ञाः अनुसरन्ति चेत्तदा फलस्योचितमात्रायाः निर्णयः सम्भवोऽस्ति। अन्यथा शून्यफलस्थाने बलसाधनोपक्षया पूर्णफलमपि दैवज्ञैरादेष्टुं शक्यते।

1-फलितमार्तण्ड-भूमिकायां , पृ.सं.-7